मध्यम पदरहने पर अनिच् न हो धर्मके पूर्वमें पूर्वपद होना चाहिए इसका **परमः स्वोधर्मो यस्य** उत्त है अपपना कर्तव्य जिसका। त्रिपद बहुव्रीहि समास में अनिच् न हो अतः केवल पढ़ा। **स्वशब्द** निश्चय ही पूर्वपद नहीं है, किन्तु मध्यम पद है। केवल का अर्थ है मध्यम पद न होना। अतः त्रिपद तहुव्रीहिमें **परमस्वधर्मः** यही होता है, अनिच् नहीं। नन्वेवं **संदिग्धः साध्यो धर्मो यस्य** सन्देहमें है साध्य–वह्नि, धर्म–धूम जिसका वह अनुमान **संदिग्धसाध्यधर्मा** है। यहाँ अनिच् कैसे ? केवल पूर्वपद नहीं। साध्य मध्यम पदका व्यवधान है। तब मूलमें कहा–पहले **संदिग्धश्चासौ साध्यश्च** कर्मधारय है **संदिग्धसाध्यो धर्मो यस्य** कर्मधारयगर्भ बहुव्रीहि है। केवल पूर्वपद मिला, अनिच् हुआ। एवं परमश्चासौ स्वश्च **परमस्वः**। कर्मधास्य, ततः **परमस्वोः धर्मो यस्य** केवल पूर्वपदसे अनिच् परम्स्वधर्मो भी साधु ही है। एवं **निवृत्तिः धर्मो यस्य निवृत्तिधर्मा** सन्यासी। **अनुच्छित्तिः धर्मो यस्य** गृहस्थ, इत्यादिमें समासे, केवल पूर्वपदसे यथायोग्य अनिच्। सूत्रमें पूर्वपद नहीं है, अनुवृत्ति होगी नहीं पूर्वपदका लाभ कैसे ? तब बोले बहुव्रोहि समासे पूर्वपदका आक्षेपसे।

। ८६४। **जम्भा-सु** हरित तृण सोम से परे जम्भके साथ बहुव्रोहिसे अनिच निपासनसे हो, कृत-किया हुआ समासान्त मान्य। भक्ष्य=खाने की वस्तु **और** दाँत दो अर्थमें जम्भ है। शोभनः, रुचिकरः, दर्शनीयः जम्भः (भोजन या दाँत) अस्ति अस्य समासे, सुजम्भशब्दात् सूत्रेण। अनिचे अन्। यस्येति अलोपे। सुजम्भन् सु। नान्त दीर्घ लोपादिः। **सुजम्भा सुजम्भानौ सुजाम्भानः**। बढ़िया भोजन या चमकीला दाँत वाले। **हरितः जम्भो यस्य**। हरा भोजन या दाँत है जिसका, समास, अनिच, आदिः पूर्ववत्। **हरितजम्भा**। तृण भक्ष्यं यस्य घास भोजन हो या तृण की तरह दुर्बल दाँत हो **तृणजम्भा**। कार्य पूर्ववत्। तृण का तत्सदृशमें लक्षणा। **सोमजम्भा** सोमः चन्द्रः इव शुभ्रः जम्भाः दन्ता यस्य **चन्द्रवत् श्वेतदन्त** अथवा सोमः = सोमलता सा इव जम्भः भक्ष्यं यस्य **सोमरस** पानकर्ता समास, अनिच् आदि **स्वादिभ्यः**=सु हरित आदिसे

सुजम्भा । हरितजम्भा । तृणं भक्ष्यं यस्य तृणमिव दन्ता यस्येति वा तृणजम्भा। सोमजम्भा । स्वादिभ्यः किं पतितजम्भः । ८६५ **दक्षिणेर्मा लुब्धयोगे ५।४।१२६।** दक्षिणे ईर्म व्रणं यस्य दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः ६६ **इच्कर्मव्यतिहारे ५।४।१२७।** कर्मव्यतिहारे यो बहुंब्रीहिस्तस्मादिच्स्यात्स-समासान्तः । केशाकेशि । मुसलामुसलि ।६७**द्विदण्ड्यादिभ्यश्च ५।४।१२८।** तादर्थ्ये चतुर्थ्येषा । एषां सिद्धयर्थमिच्प्रत्ययः स्यात् । द्वौ दण्डौ यस्मिन्प्रहरणे तद् द्विदण्डि प्रहरणम् । द्विमुसलि । उभाहस्ति । उभयाहस्ति । ६८ **प्रसंभ्यां जानुनोर्ज्ञुः ६।४।१२९।** आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ ।

परे जम्भासे अनिच् हो ऐसा क्यो ? **पतिताः जम्भाः दन्ताः भोजनादिर्वा यस्य पतितजम्भः** । दाँतझड़ा या वमनकर्ता

। ८६५ । **दक्षिणे ईर्मं व्रणं यस्य** दाहिनी ओर घाव हो (**लुब्धो=व्याधः**) उसके योग सम्बन्धमें अनिच् और बहुव्रीहि निपातनसे हो । व्यधिकरण होनेसे अनिच् अलोप । लुब्धका निर्णय व्याधसे किया गया **घाववाला मृग** । यदि रोग से व्रण घाव हो तब अनिच् नहीं । **दक्षिणेर्मः । वाली हेमाब्जमाली गुणनिधि-रिपुणा निर्मितो दक्षिणेर्मा, कथचिन्नेयः** ।

। ६६ । **इचकर्म व्यतिहारे** =क्रिया की अदलाबदलीमें जो बहुव्रीहि, उससे इच् हो, समासान्त तद्धित मान्य । यथा **केशैश्च केशैश्च परस्परं गृहीत्वा इद युद्धं प्रवृत्तं केशाकेशि** बहुव्रीहि समासे, उक्तसूत्रेण इच्, पूर्वपदस्य दीर्घे । **मुसलेन मुसलेन गृहित्वा परस्परं प्रहृत्य इदं युद्धं प्रवृतम्** इच्, दीर्घे

। ६७ । **द्विदण्ड्य** आदि गण पठित शब्दों की सिद्धिके लिए इच् निपा-तनसे करें । परन्तु वे इजन्त है उनसे इच् विधान व्यर्थ है तब बोले **तादर्थ्ये चतुर्थी** तस्मै अर्थः तदर्थ तस्य भावः । दो दण्डे परस्परमें प्रहारके लिए हो जिस युद्धमें वह **द्विदण्डि प्रहरणं** दण्डादि । युद्धका डण्डा कर्मव्यतिहार नहीं पूर्वपदको दीर्घ नहीं, **सूत्र**से इच् आदि प्रक्रिया **दण्डादण्डि** इतिवत् । समुदायको इच् निपातनसे अतः द्विदण्डा शाला इच् न । **द्वे मुसले यस्मिन्प्रहरणे** दो मुसल प्रहारके विषय हो वे **द्विमुसलि** । समासे इच् । **उभौ हस्तौ यस्मिन्प्रहरणे ऊभाहस्ति** इ पूर्व पदस्य दीर्घे । ,**उभयोऽन्यत्रा** से नित्य अयच् प्राप्त, निपा-तनसे विकल्प । क्रियाके आदान प्रदान बिना भी दीर्घ **उभयाहस्ति**

। ६८ **प्रसम्** से परे जानुशब्दों को ज्ञु आदेश हो, बहुव्रीहिमें । पूर्वपदवत् उत्तर पद को द्वित्व । **जानुनः** पञ्चमी होता, तब प्रत्ययः परश्चके अधिकारमें

प्रगते जानुनी यस्य प्रज्ञुः । सञ्ज्ञुः । ६९ **ऊर्ध्वाद्विभाषा ५।४।१३०।** उर्ध्वज्ञुः उर्ध्वजानुः ८७० **धनुषश्च ५।४।१३२।** धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात् द्विधन्वा । शार्ङ्गधन्वा । ७१ **वा सञ्ज्ञायाम् ५।४।१३३।** शतधन्वा–शतधनुः । ७२ **जायाया निङ् ५।४।१३४।** जायान्तस्य बहुव्रीहेर्निङादेशः स्यात ७३ **लोपो व्योर्वलि ६।१।६६।** वकारयकारयोर्लोपः स्याद्वलि । पुंवद्भावः युवतिर्जाया अस्य युवजानिः । ७४ **गन्धस्येदुत्पूतिसुसुरभिभ्यः ५।४।१३५।**

पञ्चमीसे ज्ञुः प्रत्यय मानाजाता । आदेश होनेके लिए षष्ठी द्विवचन । **प्रगते जानुनी यस्य** सुदृढ़ घुटनेवाला । द्विववचनसे दो जानुशब्द दोनोंके स्थानमें ज्ञु आदेश । प्रज्ञुः तगड़ा घुठनावाला । **सङ्गते जानुनी यस्य**, सटे घुटनेवाला संज्ञुः जानुनी-ज्ञुः । ६६ । **उर्ध्व** से परे जानु शब्द स्थाने ज्ञु आदेश विकल्पसे बहुव्रीहिमें हो । उर्ध्वे जानुनी यस्य ऊँचे है जङ्घे जिसके **उर्ध्वज्ञुः**जानुनी स्थाने यदा न, तदा **उर्ध्वजानुः** । ८७० । **धनुषश्चय** इसमें (ऊधसो) अनङ् आया । धनुः शव्दअन्त ऐसी बहुव्रीहिसे अनङ् आदेश हो । ङित् से अन्तादेशमें धनुषी यस्य, वाला । दो चाप समासे द्विधनुष्के ष को अनङ् । ङ इत् अकार उच्चारणार्थ द्विध- । उ--यण् द्विन्धवा । श्रृंगस्य इदं शार्ङ्गं, तस्येदम् अण् । तद्धनुर्यस्य समासे धनुष । सींग अनङ् आदि पूर्ववत । यदि ऐसा तब **स्वलावण्याशंसा धृतधनुषमह्लाय तृणवत्** इसमें समासान्तविधि अनित्य है । आर्षः ।

। ७१ । **वा-संज्ञा** अर्थमें विकल्पसे अनङ् हो । शतं धनुर्यस्य **शतधन्वा** (राजा का नाम स्मयन्तक कथामें) **संज्ञायां वा अनङ्** । शतधन्वन् स्वदिकार्ये पक्षे **शतधन्वा** । ७२ । **जाया** अन्तबहुव्रीहिसे निङ् हो अन्त्य अल्के स्थनमें

। ७३ । **लोपो** =व् य् अनयोः द्वन्द्वः, द्विवचने ओस् **व्योः**= व य का लोप हो बलि परे । **युवतिः** नवयौवना जाया--पत्नी वाला, वह पुरुष **युवजानिः** । बहुव्रीहिसमासे जायाके आको निङ् इत् । लोपो व्योः यलोपे, स्त्रियाः पुंवत्, ति हटा, नलोप । ७४ । **गन्धस्य–इत्** = उत् पूति, सु, सुरभि इनसे परे गन्ध को इ अन्त आदेश हो, पूर्वोत्तरदृष्टि से इकार अदेश । समासान्तके अधि कारमें आदेः परस्य नहीं लगता । उग्दतो **गन्धो यस्य** उठरहा **गन्धवाला** । गन्धस्येत्सूत्रेण इ अन्तदेशे **उग्दन्धि** मृगः । महक न होना पूति है।पूतिर्गन्धस्य इव गन्धो यस्य **पूतिगन्धिः** किंशुकाः निर्गन्धाः । शोभनः गन्धो यस्य **सुगन्धिः वायुः सुरभिर्गन्धो यस्य** तीव्रमँहकवाला, वायुः विशेष्य है । सर्वत्रान्ते इत्व । **गन्धस्य**= गन्धोको इव दशामें तस्य= प्रधानद्रव्यस्य **एकान्तः** एकशेष इव प्रतीयमान

एभ्यो गन्धस्येकारोऽन्तादेशः स्यात् । उद्गन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धि । 'गन्धस्येत्त्वे तदेकान्तग्रहणम्' एकान्त एकदेश इवाविभागेन लक्ष्यमाण इत्यर्थः । सुगन्धि पुष्पं सलिलं च । सुगन्धिर्वायुः । नेह सु शोभनाः गन्धाः द्रव्याण्यस्य सुगन्ध आपणः । ८७५ अल्पाख्यायाम् ।५।४।१३६। सूपस्य गंधो लेशो यस्मिंस्तत्सूपगंधि भोजनम् । घृतगंधि 'गंधो गंधक आमोदे लेशे सम्बन्धगर्वयोः । इति विश्वः । ७६ उपमानाच्च ५।४।१३७। पद्मस्येव गंधोऽस्य पद्मगंधि । ७७ पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८। हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यत् समासान्तो बहुव्रीहौ । स्थानिद्वारेणायं समासान्तः । व्याघ्रस्येव पादावस्य व्याघ्रपात् । अहस्त्यादिभ्यः

गन्ध गुण है । द्रव्यके एक भागमें युक्त नहीं, अतः एकान्तको एकदेशमें लाक्षणिक माना । एकदेशकी तरह अविभागेन--अलग लक्षित न हो सुगन्धिः वायु है । पुष्प और जल भी है गन्ध द्रव्यसे अलग प्रतीत हो अभिन्न जान पड़े । अतः नेह=यहाँ नहीं हुआ सु शोभनः मुग्धकारी गन्धवाला, मतुपका लुक् । यहाँ गन्धका द्रव्य अर्थ (चन्दन आदि) । वहति जलमियं पिनष्टि गन्धानिति प्रयोगसे गन्ध नपुंसक, द्रव्यका विशेषण' नियत पुलिङ्ग ठीक है गन्धस्तु सोरभे नृत्ये गन्धके गर्वलेशयोः । स एवं द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति कोशात् सुगन्ध आपणिकः । यहाँ सुगन्धितचन्दन दुकानसे अलग जान पड़ते हैं अतः इत्व नहीं । ८७५ । अल्पाख्या=थोड़ी अख्या कथन हो, गन्धशब्दको इ अन्तादेश हो बहुव्रीहिमें । यहाँ गन्धका अर्थ लेश है । सूप दाल का गन्ध लेश थोडी महक हो, वह सूपगन्धिः भोजनं, समासे, अन्ते इ-आदेश । पूर्वसूत्र या वार्तिक का विषय न होनेसे यह सूत्र । इस उदाहरणमें अनेकपद प्रथमान्त नहीं, इससे सिद्ध है कि व्यधिकरण=विषम विभक्ति भी बहुव्रीहि होती है । घृतस्य गन्धो लेशो यस्मिन् घृतगन्धि भोजनं, घी की थोड़ी मँहक । गन्धशब्दके अल्प अर्थमें प्रमाण गन्धो=मूलमें । ७६ । उपमान शब्दके अन्तमें इकार हो बहुव्रीहिमें । फलितार्थ कथन है । पद्मस्य इव=कमलके गन्ध की तरह गन्ध हो जिसका पद्मगंधिः मिष्ठः । उपमानकर्मसे गन्धके साथ समास होने पर अन्तमें इकार पद्मसम्बन्धित गन्धसदृशे लक्षणा । सप्तम्युपमानपूर्वपदस्य समासः ।

। ७७ । पादस्य उपमानसे परे पादके अन्तका लोप हो, हस्ति आदिको वर्जितकर, बहुव्रीहिमें, वह लोप समासान्त मान्य । शैषिक कप् निवृत्तिवास्ते अन्यथा अनुक्त समासान्तसे कप् होता । लोप=अश्रवण, अदर्शन है समासका

किम्। हस्तिपादः। कुसूलपादः। ७८ **कुम्भपदीषु च** ५।४।१३९ कुम्भपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियाम्। 'पादःपत् कुम्भपदी। स्त्रियां किम्। कुम्भपादः। ७९ **संख्यासुपूर्वस्य** ५।४।१४०। पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ। द्विपात्। सुपात् ८८० **वयसि दन्तस्य दतृ** ५।४।१४१। सङ्ख्यासुपूर्वस्य दन्तस्य दतृ इत्यादेशः स्याद्वयसि। द्विदन्। चतुर्दन्।

अन्त अवयव कैसे ? तब बोले **स्थानी** = अन्त्यअल्के द्वारा समासका अवयव मान्य, वचन बलसे। औपचारिक अवयव, फलितार्थ कथन। व्याघ्र पौदा इव पदौ यस्य, बाधके चलते समय चुट-२ करते पाँव की तरह पैर है जिसका उपमान पूर्वपद मानकर समास पादस्य अन्त्य अकारस्य लोपे **व्याघ्रपात्**। हस्ति आदि पदिक क्यो ? हस्तिपादः हाथी को तरह पीलपाँव वाला। **कुसुलपादः** सुराही इव। अन्त का लोप न हो

८७८। **कुम्भपदीषु**=बहुवचन उच्चारण से, गणपाठसे इत्यादि अर्थ। कुम्भपदो आदि गण पठितके पादके अन्त्य अल् वर्णका लोप हो, ङीप भी, निपातन से स्त्री–। एकपदी जानपदी जैसा समुदाय गणमें मान्य। उसीके लिए स्त्रियां कहा। **पादोन्यतरस्यां**के विकल्पको बाँधकर नित्य ङीष् हो। **कुम्भस्य इव पादौ** यस्य घड़ाकी तरह **पाँववाला**। समाससे, कुम्भपदीषु **च** सूत्रेण अन्त्यलोपे नित्यं ङीप जो। **पादस्य लोपः** का अनुबाद। **स्त्रियां क्यों** पढ़ा ? **कुम्भपादः** में उक्त कार्य न हो। ८७९। **सङ्ख्या** और सु पूर्वमें **हो** पादके अन्त्य अल् का लोप हो, वह लोप समास का अन्त अवयव, बहुव्रीहिमें मान्य। उपमान से परे नहीं, लोप अप्राप्त था। **द्वौ पादौ** अस्य **द्विपाद्** मनुष्यः। शोभनौ पादौ अस्य **सुपात्** बालकः। अन्यार्थसमासे पादके अन्य 'अ' का लोप।

८८०। **वयसि**=अवस्था बोध होने पर संख्या और सु पूर्वमें हो दन्तस्थाने दतृ आदेश हो। द्वौ दन्तौ यस्य द्विदन्तः दो दाँत का शिशु अवस्था बालकः। दन्तको दतृ ऋ इत्। उगित्से नुम् सु–लोप' संयोगान्तलोप उसकी असिद्धिसे उपधादीर्घ नहीं। **द्विदन्**। चत्वारो दन्ता यस्य **चतुर्दन्**। चार दातका वत्स बच्चा बछड़ा। अवस्थाज्ञानके लिए दन्तस्थाने दतृ आदि कार्य पूर्ववत्। छः दातकी अवस्थाका बालक **षोडन्**। षड् दन्ताः यस्य दतृ आदेशादिः षृप् दत् षष उत्वंसे दूसरे ष को उत्व, द को टवर्ग ड, स्वादि कार्ये। समस्त दाँतोंके परे होनेकी अवस्था का सूचक **सुदन्**। शोभनाः दन्ताः समस्ताः जाता यस्य। अवस्था विशेष ज्ञानके लिये समस्त कहा। सुदन्। स्त्रीकी इच्छामें उगितश्च

षट् दन्ता अस्य षोडन् । सुदन् दसुतौ । वयसि किं । द्विदन्तः करी द्विदन्तो नटः । ८१ **स्त्रियां सञ्ज्ञायां** ।५।४।१४३। दन्तस्य दतृ स्यात्समासान्तो बहुव्रीहौ । अयोदती । फालदती । सञ्ज्ञायाम् किं ? समदन्ती । ८२ **विभाषा श्यावारोकाभ्याम्** ५।२।१४४। दन्तस्य दतृ स्याद्बहुव्रीहौ । श्यावदन्–श्यावदन्तः, अरोकदन् अरोकदन्तः । ८३ **अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च** ५।४।१४५। एभ्यो दन्तस्य दतृ वा । कुड्मलाग्रदन् --कुड्मलाग्रदन्तः ८४ **ककुदस्यावस्थायां लोपः** ५।४।१४६। अज्ञातककुत् ।। पूर्णककुत् ।

ङीप **सुदती**--बाला, सुन्दर दाँतवाली । सूत्रमें **वयसि** अवस्था अर्थ क्यों ! **द्विदन्तःकरी**, हाथीके दो दाँत सदा है, उससे बालयुवा वृद्धका निर्णय नहीं होता । **सुदन्तः** शोभना दीप्यमानाः दन्ताः चमकते दाँतवाला । अवस्था सूचित नहीं, दतृ भी नहीं । ८१ । **स्त्रियां संज्ञा**=किसीका नाम **हो** तब दन्तस्थाने दतृ हो वह समासका अन्त अवयव मान्य, बहुव्रीहिमें । किसीका नाम है **अयोदती** अयः लौह इव दन्ताः यस्याः लोह दाँतवाली शबरी । और संज्ञा दन्तको दतृ, समास हो, ङीपभा । किसीका नाम **फालदती** फारकी तरह दाँतवाली सूर्पनखा । दतृ ङीपआदि । **संज्ञामें क्यों कहा** समाः दन्ताः यस्याः । एक समान दाँतवाली कोई भी हो नासिकोदर से ङीप । ८८२ । **विभाषा** श्यावा=मलिन दाँत, अरोका (अछिद्र) से परे दन्तको दतृ हो, अन्यार्थसमासमें । **श्यावा धूमाः दन्ताः यस्य** । धूमिल दाँतवाला **श्यावः स्यात्कपिशोधूम्रः** इत्यमरः । समासे दतृ आदेश विकल्पे पक्षे न, **श्यावदन्तः** । अरोकाः=स्वच्छाः अछिद्राः दन्ताः यस्य स्वच्छ दृढ़ दाँत । पक्षमें दतृ पूर्ववत्कार्य ।

८८३ । **अग्रान्त**=अग्र शब्द अन्तमें हो, शुद्ध शुभ्र वृष वराह इनसे **परे** दन्तस्थाने दतृ हो । च से अनुक्तसंग्रह तभी **मुषिकदन्** बना । कुड्मलानां मुकुलानां अग्राणि (खिले कमलके अग्रभागकी तरह) तानि इव दन्ताः यस्य खिल रहे हैं कमलके अग्रभागकी तरह दाँत जिसके । अग्र अन्तमें अतः दतृ आदि पक्षे न । शुद्धा=स्वच्छाः दन्ताः यस्य शुद्ध दन्, शुद्धदन्तः । शुभ्राः श्वेताः **शुभ्रदन्–दन्तः** । वृषा वर्धनशीलाः दन्ताः यस्य **वृषदन–दन्तः** । वराहः शूकर इव दन्ताः यस्य **वराहदन्=दाँतः** । ८८४ । **ककुद**के अन्त्य अल अ का लोप हो । अवस्थाका बोध होनेपर, समासमें । ककुदके अनेक अर्थ है जैसे शिखर स्वस्थ शरीर, उमड़ती युवा, इत्यादि आहारकालिक, व्यायामक्रिया अङ्ग, चढ़ता रङ्ग, हृष्ट पुष्ट अवस्था मांसलशरीर, अङ्गोका उपचय अपचय वृद्धिह्रासका

८८५ **त्रिककुत्सर्वते ५।४।१४७।** त्रीणि ककुदान्यस्य त्रिककुत् । सञ्ज्ञैषा पर्वतविशेषस्य । त्रिककुदोऽन्यः । ८६ **उद्वभ्यां काकुदस्य ५।४।१४८।** लोपः स्यात् । उत्काकुत् विकाकुत् । काकुदं तालु । ८७ **पूर्णाद्विभाषा ५।४। १४६।** पूर्णकाकुत्-पूर्णकाकुदः । ८८ **सुहृद्दुर्हृदौ मित्रामित्रयोः ५।४। १५०।** सुदुर्भ्याहृदयस्य हृद्भावो निपात्यते । सुहृन्मित्रम् । दुर्हृदमित्रः । अन्यत्र सुहृदयः । दुर्हृदयः । ८९ **उरः प्रभृतिभ्यः कप् ५।४।१५१।** व्यूढोरस्कः प्रियसर्पिष्कः । इह पुमान्, अनड्वान, पयः, नौः, लक्ष्मीः इत्येकवचनान्तानि

नाम अवस्था है । **बलीबर्द दोर्मूल गती वाल्ये उद्भूतावयवः ककुदम्** डील, भरीदेह, न जातं ककुदमस्य अभी विकास नही पा रहा बालक अवस्था सूचित है । ककुदके अन्त अ का लोप आदिः । **पूर्णककुत्** युवा अवस्था पूर्ण है, पूर्ण ककुदम् अस्य, समासे अन्त्य अलोपे ।

८८५ । **त्रि** से **ककुद** के अन्त अ का लोप हो, पर्वत विशेष त्रिकुटाचल पहाड़ अर्थ हो तब । **त्रिणि ककुदानि शृङ्गाणि** यस्य समासे । पर्वत अर्थे अन्त्य अकारस्य लोपे **त्रिककुद** । यह पर्वतका **नाम** है । यदि नाम न होता तो अलोप नहीं होता । **त्रिककुदः** तीन शिखरका कोई भी पहाड़ ।

। ८६ । **उदधि** से परे काकुद का अन्त्य अ लुप्त हो बहुव्रीहिमें । काकुद का तालु अर्थ है उन्नतं काकुदं यस्य, ऊँचा तालु वाला । **उत्काकुत्** समास अकार लोप । विगतं काकुदं यस्य तालु इव हो । अन्त्य अलोप, **विकाकुत**

। ८७ । **पूर्णात्** से परे काकुदके अन्त्य अ का लोप विकल्पसे हो । **पूर्णं काकुदं यस्य** पूर्णतालु वाला । समास अन्त्य अलोप, यदा लोपो न, तदा **पूर्णकाकुदः** । ८८ । सुहृत्= मित्र, दुर्हृत्=शत्रु अर्थमें रहे तब सुदुरसे परे हृदय को **हृत्** आदेश निपातनसे हो । सु शोभनं हृदयं यस्य समासे, हृदय हृत् आदेशे **सुहृत्** निर्छल दुःख मैं सहायक । **दुःखदं हृदयं यस्य** छली कपटी, दुःखमें धोखा देनेवाला **दुहृत् शत्रुः** । **अन्यत्र** = जहाँ मित्र या अमित्र अर्थ म हो, वहाँहृत् नहीं । शोभन हृदय वाला दुष्ट भूदयी

। ८९ । **उरः प्रभृति** आदि अन्त हो बहुव्रीहिसे कप् । समासार्थ उत्तर-पदार्थ प्रधानका अवयव मान्य । कप्के क की इत्संज्ञा नहीं, लशकु अतद्धिते पढ़नेसे ब्यूढ़ विशालं उरः वक्षस्लं यस्य चौड़ी छातीवाला **व्यूढ़ोरस्कः** महाबाहु समासे **व्यूढ़ोरः** सूत्रेण कप् । 'सोऽपदादौ' विसर्ग को स । **प्रियं सर्पिर्यस्य** घी का प्रेमी । समासे कप् इण ष् विसर्ग को ष, **प्रियसर्पिष्कः** । ननुद्वौ पुंमासौ

पठ्यन्ते । द्विवचनबहुवचनान्तेभ्यस्तु 'शेषाद्विभाषा, इति विकल्पेन कप् । द्विपुमान् द्विपुंस्कः । 'अर्थान्नञः' । अनर्थकम् । नञः किं अपार्थम् अपार्थकम् । ८९० इन स्त्रियाम् ५।४।१२।। बहुदण्डिका नगरी । 'अनिनस्मन्ग्रहणान्य-र्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' बहुवाग्मिका । स्त्रियां किं बहुदण्डी बहुदण्डिको ग्रामः । ८९१ शेषाद्विभाषा ५।४।१५४।। अनुक्तसमासान्ताच्छे-षाधिकारस्थाद्बहुव्रीहेः कब्वा स्यात् । महायशस्कः-महायशाः । अनुक्त इत्यादि

द्विपुमान् यह नहीं बनेगा उरः प्रभृतिमें पुमान् पढ़नेसे, कप् होगा । तब बोले गण सूत्रमें अविभक्तिकों का ही पाठ है । इह तु=केषाञ्चित् एकवचनान्तानामेव पाठः अनड्वान् पयः नौः एकवचनान्त मान्य । लक्ष्मी पाठ एकवचनान्तका बहुव्रीहिमें ही नित्य कप् हो । अन्यत्र=शेषाद्विभाषा विकल्प नियमार्थ । अन्यथा नद्यृतश्चसे कप् सिद्ध था, नियमका फल अकृशमकृशलक्ष्मीश्चेतसा शंसितं नः । भारवि प्रयोगसफल । द्विवचन बहुवचन अन्तके लिए शेषाद्विभाषा विकल्प कप् द्विपुंस्कः सम्पुंकानांसे विसर्गको स । गणसूत्र नञ्से परे अर्थशब्द हो तदन्तबहु-व्रीहिसे कप् । अविद्यामानो अर्थो यस्य समासे कप् । अनर्थकं विद्यमानका लोप । अपगतो अर्थो अस्मात् नष्ट है अर्थ जिससे । विकल्प कप् । नञ्पूर्वक है, नित्य कप् नहीं । अपार्थकं निरर्थक ।

। ८९० । इनः=इन् अन्तमें हो बहुव्रीहिसे कप् । स्त्रीलिङ्गमें, दण्डी अस्याः अस्ति दण्डी अत इनठनौ, इन् अन्त है । बहवः दन्डिनो यस्यां नगर्यां बहुतसे दण्डधारी हो जिसमें बहुदण्डिका । समासके बाद इनः कप् नलोप, टाप । बहुवाग्मिनका नगरी । वाक् अस्ति अस्याः वाग्मी, वक्ता, वाचोग्मिनिः । समासे बहुवाग्मिन् । इनः स्त्रियां कप्, नकारलोप, ग इत् न । अतद्धितपाठसे । च को कुत्व क, जश् ग । वहव वाग्मिनः अस्यां बहुतसे नेता वक्ता । यहाँ क इन् अनर्थक है कप् कैसे ? तब परिभाषा बोले—अन्, इन्, अस्, मन् इनका ग्रहण अर्थवान्, अनर्थकके साथ तदन्तविधि का प्रेरक है । परिभाषा बलसे कप् होगा । तब सुपथीनगरीमें कप् क्यों नहीं, समासान्तविधिकी अनित्यता से । भाष्यमें सुपथी पढ़नेसे । स्त्रियाः क्यों ? जहाँ पुं- हो, वहाँ नित्य कप् न हो । वहवः दण्डिनः यस्मिन्ग्रामे बहुदण्डी । विकल्प कप् । स्त्री नहीं नित्य कप् न । ९१ । शेषात् इस सूत्रसे जो समासान्त कहे गये, उनसे बचा हुआ शेष, अनुक्त समासान्तसे और शेषाद्विभाषाके अधिकारमें स्थित बहुव्रीहिसे कप् विकल्प हो । महत् यशो यस्य विग्रहे समासे । आन्महतः तकारस्य 'आ'

किं व्याघ्रपात् सुगन्धिः। प्रियपथः। शेषाधिकारस्थात् किम्। उपबहवः। उत्तरपूर्वा। सुपुत्रः तन्त्रादिनां शेषशब्दोऽर्थद्वयपरः। ८९२ आपोऽन्यतरस्याम् ७।४।१५॥ कप्याबन्तस्य ह्रस्वो वा स्यात्। बहुमालाकः, बहुमालकः। कबभावे बहुमालः। ८९३ न सञ्ज्ञायाम् ५।४।१५५॥ 'शेषात्' इति प्राप्तः कप् न स्यात्सञ्ज्ञाम्। विश्वे देवा अस्य विश्वदेवः। ८९४ ईयसश्च ५।४। १५६॥ ईयसन्तोत्तरपदान्न कप्। बहवः श्रेयांसोऽस्य बहुश्रेयान्। 'गोस्त्रियोः

शेषाद्विभाषा कप् 'सोऽपदादौ' विसर्ग को स महायस्कः। यदा न कप् तदा अत्वसन्तस्य दीर्घे। अनुक्तसमासान्त क्यों पढ़ा? व्याघ्र इव पादौ यस्य व्याघ्रपात् पादस्य लोपो-सूत्रसे स्थानिद्वारा लोप भी समासान्त है कप् न हो। शोभनः गन्धो यस्य सुगन्धिः वायुः। गन्धस्येत् सूत्रसे इकार समासान्त है कप् न हो। प्रियपथःमें अप् हुआ है। सूत्रमें शेषाधिकारस्थ क्यों कहा, बहूनां समीपे ये सन्ति ते उपबहवः। अत्र सङ्ख्याव्ययासन्नासे बहुव्रीहि शेषाधिकारस्थ नहीं कप् न हो। उत्तरस्याः पूर्वस्याश्च अन्तरालं दिक् उत्तरपूर्वा ईशानकोण यहाँ का समास 'दिङ्नामान्यन्तरालेसे' है जो शेषाधिकारमें नहीं कप् न हो। पुत्रेण सह आगतः सुपुत्रः में 'तेन सहेति' का समास शेषाधिकारस्थ नहीं। सकृदुच्चारितः शेषः, अर्थद्वयं कथं लभते अनुक्तसमास और शेषाधिकार दो अर्थ का लाभ कैसे? अर्थभेदे शब्दभेदः, सत्यपि अर्थभेदे शब्दस्य अभेदः तन्त्रादिना सकृदुच्चरिते सति बह्वर्थबोधकः। एकबार पढ़ा दो अर्थ समझा, एकम् अनेकोपयोगि तन्त्रम्। आदिसे आवृत्ति=दो बार उच्चरण। तन्त्रसे बोले, आवृत्तिसे समझें। यथा श्वेतो धावति। एक उच्चारण दो अर्थ। श्वा इतो धावति कुत्ता यहाँसे दौड़ता है, या श्वेतगुणवाला धावति। अनेक अर्थ दृष्ट है

। ९२। आपो कप् परे टाप वाले आ को ह्रस्व विकल्प हो। प्रत्ययग्रहणे तदन्तग्रहणं (शृद्प्रां) ह्रस्वो वा आया न कपिके नित्य निषेधका बाधक। बह्वयः माला यस्य बहुतसे मालावाला। समासे, कपि, सूत्रेण ह्रस्व विकल्पे, बहुमालकः यदा न कप् बहुमालः ढ़ेर माला वाला। स्त्रियाः पुंवत् भी।

। ९३। न। संज्ञा-में। शेषाद्विभाषासे प्राप्त कप् न हो। नाम अर्थमें व्यवधानके कप् का निषेध नहीं जैसे नद्युतश्चसे कप्। विश्वदेवः कप् का निषेध संज्ञामें नित्य समास है, लौकिक विग्रह चिन्त्य।

। ९४। ईयसश्च=ईयसुन्प्रत्यय अन्तमें हो ऐसे उत्तरपदसे कप् न हो नित्य, विकल्प सभी कप् का निषेधक। बहुश्रेयान् बहुत कल्याणवाला। शैषिक कप्

इति ह्रस्वत्वे प्राप्ते। 'ईयसो बहुव्रीहेर्नेति वाच्यम् बह्वः श्रेयस्योऽस्य बहुश्रेयसी बहुव्रीहेः किं, अतिश्रेयसिः। **८९५ वन्दिते भ्रातुः ५।४।१५७॥** पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप्स्यात्। प्रशस्तो भ्राता यस्य प्रशस्तभ्राता, सुभ्राता 'न पूजनात्' इति निषेधस्तु 'बहुव्रीहौ सक्थ्यक्ष्णोः इत्यतः प्रागेवेति वक्ष्यते। वन्दिते किं मूर्खभ्रातृकः। **८९६ नाडीतन्त्र्योः स्वाङ्गे ५।४।१५९॥** स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कब्न स्यात्। बहुनाडिः कायः। बहुतन्त्री-ग्रीवा। बहुतन्त्रीर्धमनी। स्त्रीप्रत्ययान्तत्वाभावाद्ध्रस्वो न। स्वाङ्गे किं,

---

का (**ईयसन्त** देखकर) निषेध। बहुतसी कल्याणीवाला बहुश्रेयसी पुरुषः। अन्य पदार्थप्रधानमें उपसर्जन **स्त्री**प्रत्ययान्त श्रेयसी को गोस्त्रयोरुपतर्जनस्यसे ह्रस्व प्राप्त, तब **ईयसः**=ईयस्प्रत्ययान्त बहुव्रीहिसे परे स्त्रीप्रत्यय को ह्रस्व न हो, इति निषेधे। नद्यृतश्च नित्यकप् का भी, लिङ्गविशिष्टपरिभाषासे निषेध। सूत्रमें बहुव्रीहि **क्यों** पढ़ा ? तत्पुरुषमें निषेध न हो। यथा श्रेयसीम-तिक्रान्तः अतिश्रेयसिः ह्रस्व हुआ, भगवतीसे भी भाग्यवान्।

। ८५९। **वन्दिते** (वदि अभिवादनस्तुत्योः) प्रणाम स्तुतिके **योग्य** पूजित अर्थमें भ्रातृ अन्तसे कप् न हो। **प्रशस्तो भ्राता यस्य** अभिनन्दनीय भाई-समासे, ऋदन्त कप् का निषेध। शोभनः भ्राता यस्य **सुभ्राता** रामः। ऋदन्त कप् का निषेध। स्तुतियोग्य **भाई**वाला। यह निषेध '**न** पूजनात्'से भी सिद्ध तब बोले – न पूजनात् का निषेध बहुव्रीहौ सूत्रसे पहले ही होता है। इति वक्ष्यते ऐसा कहेगें। **नद्यृतश्चसे कप्** का निषेध, न पूजनात् न करपाता, तव यह सूत्र। **वन्दिते**—पूजित भाई **अर्थ क्यों** ? मूर्खः भ्राता यस्य **मूर्खभ्रातृकः** लण्ठ भाईवाला। कपः निषेधो न। । ९६। **नाडी** शरीर की नाडियाँ, **तन्त्री नश** तार ये **शब्द** स्वाङ्ग=मनुष्यके प्राणिस्थमात्रके **अङ्ग शरीर** सम्बन्धी हो **तब** तद-न्तसे कप् नहो। वह्वचः नाड्यः यस्य बहुत नाडीवाला काय-शरीर **बहुनाडिः** **नद्यन्त** मानकर प्राप्त कप् का निषेध। उपसर्जन ह्रस्व। बह्वचः तन्त्र्यः यस्याः नद्यन्त कप् का निषेध। **बहुतन्त्रीग्रीवा** अनेक नाडी प्राणिस्थ है, स्वा-ङ्गभी, कप् का **निषेध**। वीणा तन्तुमें तन्त्री प्रसिद्ध, किन्तु यहाँ धमनी (वाह्यप्रयत्नविवार श्वास घोष आदि) तन्त्री गलेमें है। बहुतन्त्रीमें गोस्त्रियोः से ह्रस्व क्यों नहीं, स्त्रीप्रत्यान्तके अभावसे। लक्ष्मीकी तरह ईकारान्त है। आवितृस्तृतन्त्रीभ्य ईः। औणदिक सूत्र, स्त्रियांके अधिकारमें नहीं। स्वाङ्ग चेतनका अवयव क्यों कहा ? बहुत नाडीवाला खम्भा। कप् का निषेध नहो,

बहुनाडीकः स्तम्भः बहुतन्त्रीका वीणा । ८९७ निष्प्रवाणिश्च ५।४।१६०।। कबभावोऽत्र निपात्यते । प्रपूर्वाद्वयतेर्ल्युट् । प्रवाणी तन्तुवायशलाका । निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः । समाप्तवानः । नव इत्यर्थः । ८९८ सप्तमी-विशेषणे बहुव्रीहौ २।२।३५।। सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । कण्ठेकालः । अतएव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः । चित्रगुः* 'सर्वनाम-'सङ्ख्ययोरुपसंख्यानम्' सर्वश्वेतः । त्रिशुक्लः ।* 'मिथोऽनयोः

खम्भा प्राणि नहीं है । । ९७ । निष्प्रवाणी को भी कप् का अभाव निपातनसे कहें । प्रपूर्वक वेञ् (तन्तु सन्ताने) का सूत नाथने, कपड़ा बुननेके अनुकूल क्रिया । प्र पूर्व वेञ्से आधारमें ल्युट् । प्रोयते अस्यामिति प्रवाणी पूर्वपदात्संज्ञायां णः तन्तुवायशलाका-जुलाहेका साधन निर्गता- निकल गयी है । प्रवाणी तूणी बीमा जिससे वह वस्त्र-निष्प्रवाणी, कप् का अभाव । समाप्तवानः समाप्तं वानं बुनने की क्रिया जिसकी वह) पटः, शैषिक कप् का अभाव ।

। ९८ । सप्तमी=विशेषण का बहुव्रीहिमें पहले प्रयोग हो । प्रत्यय ग्रहणे -तदन्तविधिः । कण्ठे तिष्ठति कण्ठेस्थः । स काली यस्य, कण्ठेपूर्वक स्थासे 'क' सप्तमी उपमानपूर्वपदका समास, स्थ का लोप । अमूर्धमस्तकात्-सप्तमी अलुक् । कण्ठेकालः शङ्करः । कण्ठेस्थः प्रथमान्त, कालः भी, समान आधार अनेकमन्य-पदार्थे समास होगा सप्तमीग्रहण व्यर्थः । व्यधिकरण=भिन्नविभक्तिके साथ समासका नियामक व्यापक आधार विशेषण कहना पूर्ण था, सप्तमी क्यो पढ़ा । जब स्थ को हटाकर कण्ठे हीं रहेगा, अप्रथमान्तहै, समास अप्राप्त, तब पूर्वनिपात और अप्रथमान्त का भी अन्यार्थ समास होता है । सप्तमीका अभाव सच्छास्त्रजन्मा इति । इसी ज्ञापनसे व्यधिकरण समास सुनिश्चित है । चित्रा गावो यस्य चित्रगुः दोनो प्रथमान्त, निश्चित विभक्ति । दोनों को पूर्वनिपात प्रप्त, उत्तरपदको ही पूर्व हो विशेष पढ़ा । सर्वनाम या संख्या का ही पूर्व निपात हो बहुव्रीहिमें । सर्वः श्वेतो यस्य स सर्वश्वेतो धावति । दोनों गुणवचन हैं । विशेषण कौन विशेष्य कौन किसका पूर्व निक्षेप, तब वार्तिकसे सर्वनाम का पूर्व निवास । उपसर्जन भूतपूर्वगतिसे । सर्वनाम, द्वौ शुक्लौ यस्य दो अङ्ग सफेद, हों । त्रयः शुक्लाः यस्य तीन अङ्ग सफेद । किसको पूर्व प्रयोग प्राप्त था संख्या ही पूर्वपद हो, द्वि दोनोंमें । ननु द्वौ अन्यौ यस्य स द्व्यन्यः दो अन्य पुरुषवाला । सर्वनाम औंर संख्यामें इसके पूर्वप्रयोगका पक्षपात होगा द्वि अन्य दोनो सर्वनाम है मिथोः अनयोः= दोनोंके बीच संख्याका पू निपात

समासे सङ्ख्या पूर्वं शब्दपरविप्रतिषेधात्' । द्व्यन्यः ।* 'संख्याया अल्पीयस्याः' द्वित्राः । द्वन्द्वेऽपि । द्वादश । 'वा प्रियस्य' गुडप्रियः, प्रियगुडः ।* 'गड्वादेः परा सप्तमी, गडुकण्ठः । क्वचिन्न । वहेगडुः । ८९९ निष्ठा २।२।३६॥ निष्ठान्तं बहुव्रीहौ पूर्वं स्यात् । कृतकृत्यः* जातिकालसुखादिभ्यः परा निष्ठा वाच्या' सारङ्गजग्धी । मासजाता । सुखजाता । प्रायिकं चेदम् । कृतकटः पीतोदकः । ९०० वाऽऽहिताग्न्यादिषु २।२।३७॥ आहिताग्निः । अग्न्या-

---

पूर्व निवास हो । शब्दपर विप्रतिषेधके पाठसे वार्तिकमें संख्या परमें पढ़ा उसी का (**तुल्यबलविरोधे परं कार्यं**) पूर्व प्रयोग द्व्यन्यः । संख्यायां=संख्यावाचकोंके ससासमें **अल्पीयस्याः** कम का पूर्व प्रयोग । यथा **द्वौ वा त्रयो वा** समासे द्वि (कम संख्या का पूर्वप्रयोग द्वन्द्वके समासमें भी कमसंख्या पूर्वमें हो । इसका बहुव्रीहिमें प्रयोग कैसे ? **अपि** से द्वन्द्व अद्वन्द्व दोनों मान्य । **द्वौ च दश च** द्वादश तत्पुरुषमें **शतानां विंशति विंशतिशतं**, सहस्त्राणां शतं, शतसहस्त्रं, भाष्यकैयट प्रयोग भीं अल्पसंख्याके पूर्व प्रयोगमें प्रमाण ।**(वा)प्रियस्य** बहुव्रीहिमें प्रिय का पूर्व प्रयोग **गडुः प्रियो यस्य** या **गडूना प्रियः** दोनों का पक्षमें पूर्व० **गड्वादयः** माँसकी गाँठ **दुर्मांसग्रन्थिः का** नाम, **गडु कण्ठे यस्य** गलगण्ड । किस की संज्ञा नहीं, सप्तमी का अलुक् नहो, किन्तु लुक्से । सप्तमी का पर प्रयोग कहीं नहीं । **बहेः गडुः** कन्धे पर दुर्मासग्रन्थिः सप्तमीका पर प्रयोग नहीं । पद्मन्नाभौ यस्य पद्मनाभः, पूर्णौ नाभौ यस्य पूर्णनाभः ।

१९९ । **निष्ठा प्रत्यय** अन्तमें हो उसका पूर्वनिवास । अन्यपदार्थमें हो । क्त क्तवतुकी निष्ठासंज्ञा । कृतं कृत्यं येन, कार्यपूर्ण किया जिसने **कृतकृत्यः** । दोनों क्रिया रुप, इच्छानुसार पूर्वप्रयोग प्राप्त, निष्ठान्त का ही पूर्वप्रयोग । कृत=कृसे क्त निष्ठा है । **जातिकालसुख** आदि निष्ठा (क्त क्तवतु) वाले शब्द पर-पश्चात्प्रयोग हो । **अनाच्छादनात्** से ज्ञापित । सारङ्गः हरिणः जग्धः खादितः यया सा **सारङ्गजग्धी** । सिंहिनी हरिण खा **गयी** । **अस्वाङ्ग**से ङीष । हनसे क्त निष्ठासंज्ञकः जग्धी का पर प्रयोग । यह जाति का उदाहरण । कालपूर्वका-**मासो जातो यस्या मासजाता** बाला, एकमहीनाकाल अर्थ, निष्ठान्त जातका परप्रयोग । **सुखं जातं यस्या** सुखसे बीता जिसका । जातका पर प्र । **प्रायिकं**=यह परप्रयोग प्रायः होता है कहीं नहीं भी । **कृतः कटो येन कृतकटः** । चटाई जाति है, पर निष्ठाका पर प्रयोग नहीं देखा जाता । **पीतमुदकं येन पीतोदकः** पीया है जिसने, उदक जाति है तब भी पीत का पर निवास नहीं

हितः । आकृतिगणोऽयम् ।* 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ' । अस्युद्यतः । दण्डपाणिः । क्वचिन्न । विवृतासिः ।

॥ इति बहुव्रीहिसमासप्रकरणम् ॥

अथ द्वन्द्वसमास प्रकरणम्

९०१ **चार्थे द्वन्द्वः** २।२।२९॥ **अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते । स द्वन्द्वः ।** समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । परस्परनिरपेक्षस्याने-

---

हुआ । ९००। **वाऽऽहि**=आहिताग्नि आदिमें निष्ठाका पूर्व प्रयोग हो । **आहिताः आधानेन संस्कृताः अग्नयो येन आहिताग्निः** । निष्ठा आहित का पूर्वनिवास विकल्पसे, पक्षमें परप्रयोग, यह गण-आकृति देखकर मान्य । **प्रहरणार्थेभ्यः** अस्त्र अर्थके साथ निष्ठा और सप्तमीका परमें निवास । निष्ठामें असिः उद्यतो येन तलवार उठाया जिसने **अस्युद्यतः** पर निवास । दण्डः पाणौ यस्य हाथमें डण्डा वाला पाणौ सप्तमी का पर प्रयोग । **दण्डपाणिः** कहीं पर प्रयोग नहीं भी, व्याख्यानसे । **विवृतासिः** विवृतः कोषान्निष्काशितो येन—म्यानसे निकाला तल-वार जिसने । यहाँ विवृतका पूर्वनिवास हुआ, पर नहीं । इस प्रकार गणमें मानकर अनुकूलता सम्हालें । **इति प्राभाकर्यां बहुव्रीहिः**

अथद्वन्द्वः—

समासमें दोनो पदोंका अर्थ प्रधान होनेपर दो या अनेक पदके समास= एकअर्थ, एकपद, एकशक्तिका अध्याय आरम्भ । दोनों पदप्रधान हों, क्रियामें मिलकर समर्थ हों, इसका प्रस्तावक सूत्र । ९०१ । **चार्थे**-च के अर्थमें अनेक-सुबन्त विद्यमान हों विकल्पसे समास हो । **समस्यते=एकीभूय भवति**, वह एकार्थीभाव द्वन्द्वसमास मान्य । अनेकमन्यपदार्थेसे अनेकं, सुबामन्त्रितेसे सुप् आया । समास और विभाषाका अधिकार । एकम् अनेकं २, ३, ४, आदि । चकारका अर्थ बोले **समुच्चय, अन्वाचय, इतरेतरयोग, समाहार** । अमरकोशमें **चाऽन्वाचयसमाहारेतरेतरसमुच्चये** । सम्मुच्चय बोले—**परस्पर**=एक दूसरेकी अपेक्षा न कर एकमें सम्बन्ध समुच्चयः । सम् उत्पूर्वक चिञ् चयने धातुका विना सम्बन्धके संग्रहके अनुकूल परस्पर निरपेक्ष्य क्रिया अर्थः । यथा **ईश्वरंगुरुं च भजस्व** भगवान और गुरुकी सेवा करो, इश्वर गुरु परस्परमें निरपेक्ष्य हैं । सम्बन्ध नहीं, एक च से गुरुको, ईश्वरकी अपेक्षा हो, किन्तु ईश्वरका सम्बन्ध जोड़नेवाले दूसरा च नहीं, अतः एक ही च पढ़ा । **ईश्वरं भजस्व गुरुं च**

कस्यैकस्मिन्नन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वये इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्व इति समुच्चये भिक्षामट गां चानय इत्यन्वाचये च न समासोऽसमर्थ्यात्। धवखदिरौ। सञ्ज्ञा-

---

भजस्व। ईश्वरका भजन करो गुरुका भी भजन करो, दो वाक्य। क्रियामें, द्रव्यका संग्रह। **राज्ञो गजश्च अश्वश्च** राजाका हाथी है घोड़ा भी। द्रव्यमें द्रव्यका संग्रह। **पटःकृष्णो रक्तश्च**। वस्त्र काला है लाल भी। द्रव्यमें गुणोंका संग्रह। **रक्तः पटः कुण्डलं च,** लाल कपड़ा है कुण्डल भी। गुणमें द्रव्यका मिलित अन्वय। **अनु० आ पूर्वक चि** धातुका प्रसङ्गवशात्संग्रहके अनुकूलक्रिया **अन्वाचय** है। एकपदके साथ प्रसङ्गसे दूसरे पदको जोड़ना, एकका दूसरेमें उद्देश्य होना **अन्वाचयः चार्थः**। यथा **भिक्षामट गां चानय**। भिक्षा माँगो यदि गाय मिले तो लेते आओ। अट्गतौ, भिक्षा माँगकर लाओ, **यदा गौः सङ्गताचेत् तामपि आनय**। मुख्य भिक्षाटन, प्रसङ्गसे गायका आनयन, दोनों कर्मोंका परस्पर समानसम्बन्ध क्रियाके साथ न होनेसे सामर्थ्य निश्चित नहीं। **इतरेतरयोगका लक्षण**–परस्पर मुखापेक्षी=मिलाकर एक क्रियापदमें जुड़ना इतरेतरयोग **परस्परसाहचर्यं च** का अर्थः। इतरस्य इतरेण सह योगः सम्बन्धः क्रियायामन्वयः। यथा **धवश्च खदिरश्च धवखदिरौ** छिन्धि। धव किसी वृक्षका नाम, (खैर, चूना) प्रसिद्ध दोनोंको, एकसाथ काटो। परस्पर सह भावका सूचक दो चकार। **समाहार=समुदाय** अर्थ परस्पर सहभावसे एक समूह अर्थ होना। यथा **संज्ञापरिभाषयोः समूहः संज्ञापरिभाषम्**। इतरेतरयोगमें सहभाव विशेषण है, समाहारमें विशेष्य। संज्ञापरिभाषाका समुदाय। **तत्र इति**। समुच्चय अन्वाचयमें समास नहीं होता, **सामर्थ्य**=एकार्थीभाव न होनेसे। धवश्च खदिरश्च लौकिकविग्रह, धवसु खदिर सु अलौकिकविग्रहे **चार्थे द्वन्द्वः अनेकं सुबन्तं चार्थे वर्तमानं दृष्टवा समासे समासत्वात्प्रातिपदिकसंज्ञायां सुपोधातुप्रातिपदिकयोः सुपो लुक् एकदेशविकारन्यायेन प्रातिपदिकसंज्ञा द्विवचने औ धवखदिरौ एवं संज्ञा च परिभाषा च तयोः समाहारः**। संज्ञासु परिभाषासु समासादिः। समुदाय एक है। अतः एकवचन, स नपुंसकम्। **अनेकोक्तेः**=चार्थे द्वन्द्वःमें सुप्सुपा आता तो धवखदिरौ आदि बनते, **'अनेक' कहना** व्यर्थ है। तत्र बोले नहीं, जहाँ अनेक=दो चार दस अधिक सुबन्त हों, वहाँके लिए अनेकोक्तेः सफल। यथा **होता च पोता च नेष्टा च उद्गाता च** बहुतोंके साथ द्वन्द्वके लिए 'अनेक' पढ़ा। **आनङ्ऋतो** द्वन्द्वसे नेष्टाका आनङ् होगा, उत्तरपद परे।

परिभाषम्। अनेकोक्तेर्होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा पुनर्द्वन्द्वे तु होतापोतानेष्टोद्गातारः। ९०२ राजदन्तादिषु परम् २।२।३३॥ एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः।* 'धर्मादिष्वनियमः' अर्थधर्मौ-धर्मार्थौ। दम्पती-जम्पती-जायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयम्। ९०३ द्वन्द्वे घि २।२।३२॥ द्वन्द्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ।* 'अनेकप्राप्तावेकत्र

होतृ पोतृको आनङ् नहीं मध्यपदके अन्तरसे, उत्तरपद नहीं मिला। यदि द्वयोः=दो दोका द्वन्द्व करें, **होता च पोता च** होता पोतारौ होतृमें आनङ्। ततः नेष्टा च उद्गाता च द्वन्द्वपूर्वको आनङ् ततः **होतापोतारौ च नेष्टोद्गातारौ च** दो द्वन्द्वका द्वन्द्व, पूर्वको आनङ्। ङ इत् ङिच्च अन्त्य अल्स्थाने आदेशे। **अन्तर्वर्तिनी**=समासके भीतरकी लुप्त विभक्तिको प्रत्ययलक्षणसे मानकर षट्संख्या, नलोप। **होता पोता नेष्टोद्गातारः** भी सिद्ध।

।९०२। **राजदन्तादिगणमें** पढ़े हुए उपसर्जन पूर्वके पूर्वप्रयोगको बांधकर **पर** निवास हो। जो पूर्वके योग्य है वह परमें हो जाय दांतोंका राजा **राजदन्तः** तत्पुरुषमें उपसर्जन विशेषण बना, दन्तका **पर** प्रयोग। उसी गणमें **विश्वक्सेनार्जुनौ** आदि द्वन्द्व पढ़े गये पूर्वनिपात बाधकर परनिपातार्थ सूत्र। **गणसूत्र धर्मादिगणमें** पठितके पूर्व निवासका नियम निश्चित नहीं पर निवास भी हो। अर्थश्च धर्मश्च **अर्थधर्मौ** द्वन्द्वसमास **धर्मार्थौ** भी होगा। **जाया च पतिश्च दम्पती**। विवाहितास्त्री पुरुष। जायाशब्दको दम्भाव। जम् हुआ तब **जम्पति**। विकल्पपक्षमें **जायापती**। निपातनसे द्वन्द्वमें आकृति=स्वरूपको देखकर गणपाठ मान ले। जहां भी पूर्वप्रयोगके योग्य परमें मिलें वहां गण मान्य। ९३। **द्वद्वे**=द्वन्द्वसमासमें जिसको घिसंज्ञा हुई हो उसका पूर्वप्रयोग हो। यथा हरि विष्णु, हर शङ्कर एकसाथ 'नमामि' नमनक्रियामें **हरिहरौ** का मिलित सम्बन्ध। **हरि सु हर सु चार्थे** द्वन्द्वः **समासे, हरिशब्दः घिसंज्ञकः द्वन्द्वे घि** हरिको पूर्वनिपात। ननु हरिहर गुरुवः, हरिश्च हरश्च गुरुश्च समासे। गुरु घिसज्ञक हैं, पूर्वनिपात क्यों नही, तब बोले **अनेक प्राप्तौ**=दो तीन घिसंज्ञक हों, द्वन्द्वमें **एकत्र**=एक घिसंज्ञकको नियमसे पूर्वनिपात हो। शेष= अन्य घिसंज्ञकका पूर्वनिपात विकल्पमें हो। **आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते न प्रतिव्यक्तिषु आवृत्यादि=एकस्यपूर्वनिपाते सति जातौ प्रवृत्तं लक्षणं पुनः न प्रवर्तते** लक्ष्यके अनुरोध से। व्यक्तिपक्ष–अमान्य। अल्पाच्तरं

नियमोऽनियमः शेषे' हरिगुरुहराः हरिहरगुरवः। ९०४ अजाद्यदन्तम् २।२।३३।। इदं द्वन्द्वे पूर्वं स्यात्। ईशकृष्णौ, बहुष्वनियमः। अश्वरथेन्द्राः, इन्द्राश्वरथाः। 'घ्यन्तादजाद्यदन्तं विप्रतिषेधेन' इन्द्राग्नि। ९०५ अल्पाच्तरम् २।२।३४।। शिवकेशवौ।* ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण' हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। समाक्षराणां किं ग्रीष्मवसन्तौ।* 'लघ्वक्षरं पूर्वम्' कुशकाशम्।* 'अभ्यर्हितं च'। तापसपर्वतौ।

सूत्रके भाष्यमें अनेक घिसंज्ञक समुदायमें हर गुरु शब्दका अनियमः कोई भी पूर्वमें हो। हरिगुरुहराः भी होगा।

।९०४। **आजादि** हो **अदन्त** भी तब दोनों **पदार्थ**प्रधान समासमें पूर्व निवास हो। यथा **ईशश्च कृष्णश्च भक्तान् पालयतः**। पालन क्रियामे शिव-माधव दोनों मिलित है ईश अजादि हैं अदन्य भी तस्य पूर्वनिवासः। कृष्ण अदन्त है अजादि नहीं। **बहुषु**=बहुतका द्वन्द्व समास हो, तब **अनियमः**=नियम नहीं। यथा **अश्वश्च रथश्च इन्द्रश्च** अनेकका द्वन्द्व है, नियम नहीं रहा। किसीका पूर्वनिवास, **इन्द्राश्वरथाः** मार्ग तिष्ठन्ति। **घ्यन्तात्**=घिसंज्ञक अन्तमें हो, ऐसे द्वन्द्वसमासमें 'द्वन्द्वे घि' के पूर्वनिवासको **विप्रतिषेध**=तुल्यबल विरोधमें परकार्य के बलपर अजादि अदन्त इन्द्रका पूर्वनिवास हो। **इन्द्रश्च अग्निश्च** समासे **इन्द्राग्नी** परीक्षाङ्कुरुतः। अग्नि घिसंज्ञकका पूर्वनिवास, बाधकर अजादि अदन्त इन्द्रका पूर्वनिपात।

।९०५। अल्पः संख्यः अच् यस्य स **अल्पाच्** कम स्वर। तदेव स्वार्थे तरप्। **अल्पाच्तरम्** कम स्वरका पूर्वनिवास हो। द्वन्द्वमें। **शिवश्च केशवश्च शिवकेशवौ** एकरूपौ स्तः। शिवाय विष्णुरुपाय विष्णवे शिवरुपिणे। पाखण्ड-भेदवाद, प्रकर्ष अर्थमें तरप मानकर (शिवको प्रकर्ष केशवका अपकर्ष मानना पाखण्ड है) ऋतुनक्षत्रोंका **समाक्षराणां**=समानं सदृशमक्षरं येषां, समान अक्षर हों द्वन्द्वसमासमें **अनुपूर्वेण**=जिस क्रमसे उच्चारण हो उसी क्रमसे प्रयोग मान्य। **हेमन्तश्च शिशिरश्च बसन्तश्च** तीनों ऋतुओंका क्रमिक लोकप्रसिद्ध समान अक्षरसे। तथा पूर्वविराम। कृत्तिका च रोहिणी च। सम अक्षर। नक्षत्रका तथा निवास। वार्तिकमें समान अक्षर क्यों पढ़ा, विषम अक्षरमें यथा उच्चरित न रहे, किन्तु अल्प अच्का पर्वप्रयोग हो **ग्रीष्मश्च बसन्तश्च** ग्रीष्म वसन्तो गतौ। विषम अक्षर अल्प अच् ग्रीष्मका पूर्वनिपात। **लघुअक्षर**का भी पूर्वनिवास हो द्वन्द्वमें। **कुशाश्च काशाश्च** एतेषां समाहारः **कुशकाशं**, लघु

'वर्णानामानुपूर्व्येण' ब्राह्मणक्षत्रियविट्शूद्राः ।* 'भ्रातुर्ज्यायसः' युधिष्ठिरार्जुनौ । ९०६ द्वन्द्वश्च प्राणितुर्यसेनाङ्गानाम् २।४।२।। एषां द्वन्द्व एकवत्स्यात् । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम् । प्राण्यङ्गादीनां समाहार एव यथा

एकमात्र अच्वाला कुशका पूर्वप्रयोग । अभ्यर्हित श्रेष्ठ पूजितका पूर्वनिवास । तापसश्च पर्वतश्च तापसपर्वतौ स्तः । पर्वत जड़ है तापस चैतन्य, अपेक्षासे पूज्य । तापसका पूर्वनिवास । भाष्ये मातापितरौ पढ़ा । गर्भधारणपोषाभ्यां (पितुर्माता गरीयसी 'स्मृतिसे माताश्रेष्ठ) वर्णानां (ब्राह्मण क्षत्रिय विट शूद्राः वर्णाः इत्यमरः) इनका आनुपूर्व्येण=जैसे क्रमसे पढ़े है, उत्पन्न है उसी क्रमसे रहें । प्रजापतिः अकामयत स मुखतस्त्रिवृत्तं निरमिमीत तैत्तिरीये । भ्रातुः भाइयोंमें ज्यायसः=जेठ भाईका पूर्वनिवास हों । युधिष्ठिरश्च अर्जुनश्च कृष्णं नमतः जेष्ठ भाईका पूर्वनिवास । यद्यपि अर्जुन की अभ्यर्हित है इन्द्रपुत्र, विष्णु अंश, वीर होनेसे । पूर्वनिवास नहीं वार्तिककी कृपासे ।

। ९६ । द्वन्द्वश्च प्राणि=चेतन, तुर्य=वादन, सेनाङ्गानि द्वन्द्वगर्भ षष्ठी । अङ्गका तीनोंसे सम्बन्ध । द्वन्द्वान्ते श्रूयमाणं पद प्रत्येकं सम्बध्यते इनके प्राण्यङ्ग, तुर्य अङ्ग, सेना अङ्गको द्वन्द्व समासमें एकवचन हो । प्राणिका प्राणिके साथ, तुर्यका तुर्यके साथ, सेनाका सेनाके साथ समासमें (एकं वक्ति एकवचनं,) पाण्योः पादयोश्च समाहारः पणिपादम् । समाहारे नपुसकम् एकवचनं, हाथ पैर प्राणिके अङ्ग है, उनके साथ समासमें एकवचन । मृदङ्ग पणव बाद्यकलाके अङ्ग है, मृदङ्ग वादनं शिल्पं कला अस्य, (ठक् आदिवृद्धि) मार्दङ्गिकश्च पाणविकश्च पणववादनं शिल्पं, अस्य भोंपू बजानेकी कला, मार्दङ्गिकपाणविकयोः समाहारः बजानेवालोंका समुदाय नपुंसक । सेनाङ्ग—रथेन चरति रथिकाः रथकी सेना 'पर्पादिभ्यष्ठन्' रथिकानाम् अश्वारोहिणां समाहारः सेनाके अङ्ग रथ घोड़ावालोंका समुदाय, एकवचन नपुंसक । समाहार द्वन्द्वमें समुदाय प्रधान, जो एक है एकवचन होगा । यह सूत्र व्यर्थ, तब बोले समाहारके एक होनेसे सिद्ध था, नियमके लिए यह प्रकरण । प्राणि अङ्ग सेना आदिको समाहारमें ही एकवचन हो । इतरेतरयोगमें एकवचनके लिए सूत्र नहीं कह सकते, समाहार ग्रहणं कर्तव्यं, वार्तिकके आनेसे इस प्रकरणमें समाहार द्वन्द्वका उदाहरण भाष्ये में है । रथिकमार्दङ्गिकौमें एकवचन रोकनेके लिए प्राण्यङ्गानां परस्परं द्वन्द्वः एकवत्, तुर्याङ्ग नां,

स्यात्। ९०७अनुवादेचरणानाम् २।४।३।। चरणानां द्वन्द्वः एकवत् स्यात्सिद्धस्योपन्यासे।* 'स्थेणोर्लुङीति वक्तव्यम्' उदगात्कठकलापम्, प्रत्यष्ठात्कठकौथुमम्। ९०८ अध्वर्युक्रतुरनपुंसकम् २।४।४।। यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात्। अर्काश्वमेधम्। अध्वर्युक्रतुः किम्। इषुवज्रौ, सामवेदे विहितौ। अनपुंसकं किं?। राजसूयवाजपेये। अर्धर्चादी। ९०९ अध्ययनतोऽविप्रकृष्टाख्यानाम् २।४।५।। अध्ययनेन

सेनाङ्गनां परस्परं द्वन्द्वः एकवत्स्वीकारात्। द्वन्द्वश्च प्राणितुर्य—प्रकरणसे समाहार द्वन्द्व होता है, अतः **सर्वो द्वन्द्वो विभाषा एकवद्भवति।**

। ९०७। **अनुवादे**=सिद्धस्य उपन्यासे, ज्ञात अर्थका उच्चारण होनेपर। **चरणानां**=शाखा अध्ययन विशेषवाचीका परस्पर द्वन्द्वमें एकवचन हो। **स्थेणों**=स्थाधातु इण् धातुके लङ् लकारके अन्तमें प्रयोग हुआ हो तभी अनुवादे चरणानां=द्वन्द्व एकवत् हो। यथा उदगात्=प्रादुर्भूत प्रकट हुआ। इण्के लुङ्में रूप। कठेन प्रोक्तमधीयते इति कठाः। कठ आचार्यसे दृष्ट मन्त्रोंका अध्ययन करनेवाले, अन्तेवासित्वात् णिनि, उसका कठ चरकात्से लुक् तद्धितके अण्का प्रोक्ताल्लुकि। कलापिना प्रोक्तमधीयते **कालापाः** अण्। सब्रह्मचारि, अण् टिलोप अध्ययन **अण्**का प्रोक्ताल्लुक्। कठानां कलापानां च समाहारः **अनुवादे चरणानां** सूत्रेण एकवत्—**कठकालाप** समुदायका प्रादुर्भाव **प्रत्यष्ठात्**=प्रति स्था लुङि रूपं, कठेन **प्रोक्तमधीयते कठाः। कौथुमिना प्रोक्तमधीयते कौथुमाः।** तेन प्रोक्तं अण् स ब्रह्मचारि। टिलोप, अध्येता-अण्का लुक्। कठानां कौथुमानां च समाहारः **कठकौथुमम्** चरण मानकर एकवत्। स्थेणोः क्यों? अभूवन् कठकालापाः लुङ् है स्था, इण् नहीं, न एकवत्। लुङि क्यों? **अतिष्ठन् कलापाः।** लङि एकवत् न हो।

। ९०८। **अध्वर्यु**=कर्मविधायक=यजुर्वेदमें विधान किया गया जो क्रतु—यज्ञ उसका वाचक नपुंसकलिङ्गोंका द्वन्द्व एकवचन हो। **अर्काश्च अश्वमेधश्च** अर्कः=महाक्रतुः और अश्वमेध दोनों यजुर्वेदमें प्रसिद्ध है। द्वयोः समाहारः **अर्काश्वमेधं** सूत्रेण एकवचनम्। अध्वर्यु क्यों? यजुर्वेदसे लक्षित यज्ञ मान्य, उससे भिन्न अमान्य। इषुश्च वज्रं च **इषुवज्रौ** दोनों यज्ञ है। सामवेदमें प्रसिद्ध है। एकवत् न हो। **अनपुंसक क्यों?** यजुर्वेदमें राजसूयंच वाजपेयं च, ये दोनों नपुंसक है एकवत् न हो। दोनों यदि पुलिङ्ग है, तब इनको अर्धर्चादि मानें। ९०९। **अध्ययनतो** (तृतीया अर्थमें तस्) अध्ययनके

प्रत्यासन्ना आख्या येषां तेषां द्वन्द्वः एकवत्। पदकक्रमकम्। ९१० जातिरप्राणिनाम् २।४।६।। प्राणिवर्जजातिवाचिनां द्वन्द्वः एकवत्। धानाशष्कुलि। प्राणिनां तु, विट्शूद्राः। द्रव्यजातीयानामेव। नेह–रूपरसौ। गमनाकुञ्चने।

अविप्रकृष्टप्रत्यासन्न–समीपमें आख्या कथन हो उनका द्वन्द्वमें एकवचन हो। **पदानि अधीयते पदकाः। क्रमानधीयते क्रमकाः** क्रमादिभ्योः वुन् पदकानां क्रमकाणां समाहारः। वेदके पद और क्रमका उच्चारयिताका समुदाय। पदके वाद क्रमका अध्ययन। अध्ययनके समीपमें अध्येताका आरोप (पद पढ़कर क्रग पढ़ें) यह प्रत्यासत्ति है। **अध्ययनतः क्यों ?** पितापुत्रौ। एकवत् न हो। **प्रत्यासन्न क्यों** ? याज्ञिकनैयायिकौ। दूर है न एकवत्।

। ९१०। **जातिः**। जातिवाचिनां=षष्ठीका व्यत्यय प्रथमा अप्राणि=चेतनको छोड़कर जातिवाचकोंका द्वन्द्वमें एकवचन हो। **धानाश्च शष्कुल्यश्च** तासां समाहारः (धान, पूड़ीका ढ़ेर) जाति अर्थमें एकवचन, नपुंसक ह्रस्व। चेतनोंका समाहार हो तब एकवत् नहीं। **विश्च शूद्राश्च** समासे यह सूत्र प्राणिभिन्न प्राणिसदृश द्रव्यजातिवालोंका एकवत् गुणगतजाति, क्रियागतजातिका एकवत् नही। रुपंच रसश्च **रूपरसौ** पिबतः। न एकवत्। गमनं च आकुञ्चनंच, क्रियागत जातिगमन संकोचक्रिया, न एकवत्। ननु बदर्याः फलानि **बदराणि** आमलक्याः फलनि **आमलकानि** वेर या आवलाका विकार उसकाफल है विकार प्रत्ययका 'फले लुक्' तद्धितलुक्परे ङीपका लुक्। बदर आमलक फलत्व जातिके अर्थमें क्योंकि समस्त बेर आंवलाका ज्ञान होगा बदराणि च आमलकानि च एतेषां समाहारः **बदरामलकम्** एक रुप होगा। **बदरामलकानि** रूप नहीं बनेगा। जातिरप्राणिनांसे एकवचन नित्य है। **जाति-प्राधान्य**=जहाँ जाति अर्थ मुख्य हो वहाँ एकवद्भाव। **सामान्यं जातिः** एक हो अनेक में रहे, फलत्व एक है। सभी वेरमें, आमलकत्व सभी आवलेमें। क्योंकि सभी वेर व्यक्तिमे, आंवला व्यक्तिमें 'अनुस्यूत (मालामें सूत इव) है जाति अमूर्त है (आश्रये आधार) व्यक्ति चाहिए। क्रियाजातिका उपयोग व्यक्तिके माध्यमसे। चूंकि जाति सब व्यक्तिका बोधक है अतः प्रधान जातिमें एकवचन **बदरामलकम्**। यदि **अरण्यानि बदरामलकानि** कहें जंगलीवेर आंवला का ज्ञान होगा, ग्रामीण, पहाड़ीका नही। अतः कहा द्रव्यविशेष व्यक्ति पक्षका महत्व हो, तब एकवचन नहीं होता। **बदरामलकानि**। क्षीरोदके कप्रत्ययः। **क्षीरञ्च उदकञ्च** दूध पानी मिलगये। जो मिल गये उसी दूध

प्राणिप्राधान्य एवायमेकवद्भावः । द्रव्यविशेषविवक्षायां तु, बदरामलकानि ।
९११ विशिष्टलिङ्गो नदीदेशोऽग्रामाः २।४।७।। ग्रामवर्जनदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः एकवत्स्यात् । उद्धयश्च इरावती च उद्धयेरावती । गङ्गा च शोणश्च गङ्गाशोणम् । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । भिन्नलिङ्गानां किं गङ्गायमुने । मद्रकेकयाः । अग्रामाः । किं ? जाम्बवं नगरम् । शालूकिनी ग्रामः । जाम्बवशालूकिन्यौ । ९१२ क्षुद्रजन्तवः २।४।८।। एषां समाहारे एव द्वन्द्वः एकवत्स्यात् । यूकालिक्षम् । आनकुलात्क्षुद्रजन्तवः । ९१३

जलका ज्ञानद्रव्यप्रधान । अतः एकवचन नहीं । यदि सभी दूध सभी जलका ज्ञान होता तब जाति मानकर एकवचन होता । रञ्जिता तु विविधाः तरु शैला इति सिद्धम् ।

। ११ । विशिष्टलिङ्ग=विपूर्वकशिष धातु का भेद डालना अर्थ । इसी धातुसे ल्युट् करके बना विशेषण और ण्यत् करके बना विशेष्यको भेदकभेद्य कहते है । अतः भिन्नलिङ्ग वाले नदीवाचकोंका द्वन्द्व हो, या देशवाचकोंका द्वन्द्व समास हो, उनको समाहारसमासमें एकवचन हो । देशसे प्रसिद्ध जनपद मान्य ग्राम नहीं, ग्राम भिन्न ग्रामसदृश समुदायका शहर नगर । विशिष्टं लिङ्ग येषां समाहारमें ही एकवत् उक्त है । यथा उद्ध्यो नदः । नदी भी अर्थ नदी, इरावती दोनों नदी वाचक है । समासे, नदी नदसे भिन्नलिङ्ग । अतः एकवचन, नपुंसक ह्रस्व गंगानदी और शोण नद है भिन्नलिङ्ग समासमें एकवत् गङ्गाशोणं, कुरवश्च पुलिङ्ग है, कुरुक्षेत्रम् नपुंसक । समासे एकवचन । सूत्रमें भिन्नलिङ्ग क्यो पढ़ा गङ्गा च यमुना च समान लिङ्ग है न एकवत् । मद्राश्च केकयाश्च देशअर्थमें समानलिङ्ग न एकवत । नदीं देश का न एकवत । गंगाकुरुक्षेत्रे देशसे जनपद मान्य । पहाड़ नहीं —कैलाशगन्धमादने सूत्रमें अग्रामाः क्यों पढ़ा, ग्राम या अप्रसिद्ध नगरसे एकवचन होजाय, निषेध नहो । जाम्बवम् अप्रसिद्ध नगर ग्राम का नाम जाम्बवञ्च शालूकिनी च समास । एकवचन का निषेध हुआ । १२ । क्षुद्राश्च जन्तवश्च ऐतेषां समाहारः छोटे जीवो का समुदाय समासमें एकवचन हो जाय । क्षुद्रजन्तु का निर्णय आ—नकुलात्= नेवलेसे लेकर कीटाणु तक क्षुद्र जन्तुः अत्र स्मर्यते क्षुद्रजन्तुरनवस्थिः स्यादथवा क्षुद्र एव यः । शतं वा प्रवृतौ येषां केचिदानकुलादपि । जो एक जगह स्थिर न हो, छोटा ही, सौ स्थलमें दौडता रहे । सर्व साधारण उदाहरण यूकाश्च लिक्षाश्च (घने केश बाल जटाके शिर भागमें श्वेदज पसीनेसे पैदा ढ़ील लीख

येषां च विरोधः शाश्वतिकः २।४।६।। एषां प्राग्वत्। अहिनकुलम्। गोव्याघ्रम्, काकोलूकमित्यादौ परत्वात् 'विभाषा वृक्षमृग' इति प्राप्तं चकारेण बाध्यते। ६१४ **शूद्राणामनिरवसितानाम् २।४।१०।।** अवहिष्कृतानां शूद्राणां प्राग्वत्। तक्षायस्कारम्। पात्राद्वहिष्कृतानां तु चण्डालमृतपाः ११५ **गवाश्वप्रभृतीनि च २।४।११।।** यथोच्चारितानि साधूनि स्युः। गवाश्वम्

जू प्रसिद्ध है) एकवचन, नपुंसक ह्रस्व। १३। **येषां** जिन प्राणियोंका विरोध और शत्रुता हो, कभी भी एक साथ न रहे, ऐसा शाश्वतिक शश्वतः भावः निरन्तर स्वाभाविक हो, उनके परस्पर समाहार द्वन्द्वमें एकवचन हो। छाया धूप अँधेरा प्रकाश, विरोधसे एक साथ नहीं रहते **शाश्वतिक क्यों** पढ़ा **देवासुरैरमृतमम्बुनिधिर्ममन्थे**। देवता दानव अमृत लिए समुद्र मन्थन करनेमें एक साथ रहे, नित्य विरोध नहीं है। साँप नेवलेका नित्य स्वभाविक विरोध। **अहयश्च नकुलाश्च एतेषां समाहारः** इनका समुदाय **अहिनकुलम्**। सहज विरोधके अर्थ का सूचक एकवचन। **गावश्च व्याघ्राश्च** इनका समुदाय नित्य वैर का सूचक एकवचन, **काकाश्च उलूकाश्च काकोलूकं** सहज विरोधका सूचक एकवचन। यद्यपि यहाँ **विभाषावृक्षमृग** आदि सूत्र। गोमहिषं गोमहिषाःमें चरितार्थ। **येषाञ्च विरोधः** सूत्र अहिनकुलंमें सफल। **गोव्याघ्र**'में दोनों प्राप्त तब परत्वात् विभाषा वृक्ष मृग सूत्र प्राप्त होता है उसे बाँधनेके लिए येषां च सूत्रमें च पढ़ा, बाधनेके लिये। १४। **शूद्राणां**=३जातिसे भिन्न वर्णशङ्कर शूद्रत्व जाति नहीं। **क्यों** कि अनिरवसितानाम्=अवहिष्कृतानां सत्पात्र छूनेपर अशुद्ध न हो। ऐसे शूद्रोंका समाहार द्वन्द्व, समासमें एकवचन हो। **यैर्भुक्तं पात्रं क्षारोदकप्रक्षालेन संस्कारेणापि न शुध्यति ते निरवसिताः** चाण्डालादयः। जिनके भोजन किये पात्र भस्म जलसे धोनेपर न शुद्ध हों। **ययैस्तु भुक्तं पात्रं क्षारोदक प्रक्षालनेन शुद्धयति ते अनिरवसिता** सत्शूद्र। यथा **तक्षाणश्च अयस्काराश्च** (बढ़ई और लोहार का समुदाय) समासे सत्शूद्र अर्थ प्रकाश एकवचन **तक्षायस्कारम्**। जो पात्रात्=शुद्धतासे जल ग्रहणसे बहिष्कृत हैं। वहाँ एकवत् नहीं होता। **चण्डालाश्च मृतपाश्च एतेषां समाहारः**। जीवजीवी जङ्गली चर्मकार, कसाइयों का समुदाय। धर्मशास्त्रमें ये निषिद्ध है।

। ६१५) **गावश्च** इत्यादि यथोच्चारितानि जैसे पढ़े गये वैसे साधु, निपातनसे। **गावश्च अश्वाश्च** इनका समुदाय **गवाश्वं**, विभाषा वृक्षमृगसे विकल्प एकवत् प्राप्त था नित्यएकवचन अवङ्। यदा न अवङ् सर्वत्रविभाषा गोः

दासीदासमित्यादि। **१६ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्। २।४।१२।।** वृक्षादीनां सप्तानां द्वन्द्वः, अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा। * 'वृक्षादौ विशेषाणामेव ग्रहणम्' प्लक्षन्यग्रोध, प्लक्षन्यग्रोधाः। रुरुपृषतं, रुरुपृषताः। कुशकाशं, कुशकाशाः। व्रीहियवं व्रीहियवाः। दधिघृतं, दधिघृते। गोमहिषं गोमहिषाः। शुकबकं, शुकबकाः। अश्ववडवम्–अश्ववडवौ। पूर्वापरं पूर्वापरे। अधरोत्तरम् अधरोत्तरे।* 'फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेवद्वन्द्व एकवदिति वाच्यम्'

प्रकृति भावे **गोऽश्वं** पक्षे **गोअश्वः** । दास्यश्च दासाश्च इनका समुदाय एकवचन। **पुमान् स्त्रिया**:से एकशेष नहीं, निपातनसे। आदि=**गावश्च आविकाश्च** गाय भेड़ों का समुदाय **गवाविकं गवैडकम्**।

।१६। **विभाषा वृक्ष** द्वन्द्व आया। एक षष्ठी विषयभेदसे भिन्न है। अवयवषष्ठी वृक्ष मृग तृण धान्य व्यञ्जन पशु शकुनि उनका अवययके साथ द्वन्द्व। अश्ववडव पूर्वापर अधरोत्तर तीनका द्वन्द्वमें एकवत् हो। **वृक्षादौ**=वृक्ष तृण धान्य पशुके विषयमें विशेष (श्रेष्ठ, मान्य) का ग्रहण। वृक्ष द्वन्द्वका उदाहरण **प्लक्षाश्च न्यग्रोधाश्च** (पलाश बरगदका समुदाय) समासे एकवत्, विकल्पसे, पक्षे प्लक्षन्यग्रोधाः। **जातिरप्राणिनां** से नित्य एकवचन प्राप्त था। मृगका द्वन्द्व–**रुरवश्च पृषताश्च समाहारः एतेषां रुरुपृषतम्** मृगक्शेिषका झुण्ड। तृणका द्वन्द्व–**कुशाश्च काशाश्च** एकवचन। धान्यद्वन्द्व **व्रीहयश्च यवाश्च व्रीहियवं**, धान जौ की ढ़ेर। व्यञ्जनका द्वन्द्व–दधि च घृतं च अनयोः समाहारः दहीघी का ढ़ेर। विकल्प एकवचन, पक्षमें **दधिघृते**, दोवचन। पशुका–**गावश्च महिषाश्च** गायों भैंसोंका झुण्ड, सूत्रसे एकवचन, पक्षे गो–**गोमहिषाः**। पक्षीका **शुकाश्च वकाश्च** एतेषां समाहारः। एकवचन, पक्षे बहुवचव। **अश्वाश्च** पक्षे **वडवाश्च** घोड़ा घोड़ीका झुण्ड। एकवद्भाव पक्षे द्विवचन। अश्ववडवौ पूर्वपदवत्पुलिङ्ग। **पूर्वश्च अपरश्च** अनयो, समाहारः पश्चात्का समुदाय। **अधरश्च उत्तरश्च** अनयोः समाहारः। इन सभीमें सूत्रसे एकवचन, पक्षमें यथायोग्यवचन। **फल सेना** एकवद्भाव, प्रकरणका अन्तिम नियम वार्तिक है। फलसेनासे लेकर तृण तक। द्वन्द्वश्च प्राणितुर्य-जितने एकवचन करनेवाले है उनकी बहुवचनकी प्रकृति ही द्वन्द्वसे एकवचन हो। **बहवः बहुवचनान्ताः प्रकृतिः=कारणं यस्य बहुप्रकृतिः** एकवचन द्विवचनकी प्रकृति हो तब वार्तिक नहीं लगता। फलका द्वन्द्व–**बदरीफलानि आमलकीफलानि** विकार प्रत्ययका

बदराणि चामलकानि च बदरामलकम्। 'जातिरप्राणीनाम्' इत्येकवद्भावः। नेह, बदरामलके, रथिकाश्वारोहौ, प्लक्षन्यग्रोधावित्यादिः। विभाषा वृक्ष–' इति सूत्रे येऽप्राणिनस्तेषां ग्रहणं 'जातिरप्राणिनाम्' इति नित्ये प्राप्ते विकल्पार्थम्। पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते 'मृगाणां मृगैरेव शकुनीनां तैरेवो भयत्र द्वन्द्वः, अन्यैस्तु सहेतरेतरयोग एव' इति नियमार्थं मृगशकुनिग्रहणम्। एवं पूर्वापरम्, अधरोत्तरमित्यपि। अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थम्। अन्यथा

'फले लुक्' परे ङीप्का लुक्। तब **बदराणि च आमलकानि च** इनका ढ़ेर **बदरामलकम्** बहुवचनान्तके नाते एकवचन हुआ। **जातिरप्राणिनां** सूत्रके एकवचनको बाधकर। बहुत्वप्रकृतिका फल बोले नेह=यहाँ नहीं, **बदरञ्च आमलकञ्च एकवचनान्त है** एकवत् नहीं। यदि बहुवचनान्तका द्वन्द्व नहीं तब नित्य एकवत् भी नहीं। **रथिकश्च** अश्वा**रोहश्च** सेनाके अङ्ग है। किन्तु-जातिका प्राधान्य न होनेसे न एकवत्। **प्लक्षश्च न्यग्रोधश्च** वहुवचनान्त नहीं, एकवत् नहीं। इत्यादि। **रुरुश्च पृषतश्च रुरुपृषतौ** मृगौ द्वन्द्व है बहुत्व नहीं, न एकवत्। **हंसचक्रवाकौ** पक्षी है। न एकवत्। **यूकालिक्षे** क्षुद्र जन्तु हैं बहु-वचन नहीं, न एकवत्। **व्रीहियवौ**। **कुशश्च काकश्च कुशकाशौ** तृणका यहाँ एकवत् नहीं होता। बहुवचन प्रकृति न होनेसे। ये सभी प्रयोग **चार्थे द्वन्द्वः**से सिद्ध, एकवचन विकल्प भी सिद्ध, **विभाषा वृक्ष मृग क्यों**? पढ़ा? इसलिए कि **येऽप्राणिनः**=जो चेतन नहीं है उनका ग्रहण जहां हो, उक्त सभी **कुशकाशं दधिघृतम्** आदिको (जातिरप्राणिनांसे नित्य एकवत् प्राप्त था) विकल्पके लिए सूत्र पढ़ा?। न कहिये कि **पशुप्राणि** हे उसे नित्य एकवत् नहीं होगा? तब बोले–पशुका ग्रहण जैसे हाथी घोड़े इत्यादि है, उन्हें सेनाका अङ्ग मानकर नित्य प्राप्त है। विकल्पके लिए सूत्र। मृग शकुनि भी व्यर्थ न हों अतः **मृगाणां मृगैरेव** मृगोंके साथ मृगका, पक्षीके साथ पक्षीका चाहे इतरेतर हो या समाहार) एकवचन हो विकल्पसे। **अन्यैस्तु** इतरेतरयोगद्वन्द्व ही होता है, समाहार नहीं। यथा **रुरुशुकाः** रुरुमृग है शुक इतर है। इसीतरह शकुनि-का इतरके साथ, इतरेतरयोग ही होता है समाहार नहीं। इसीनियमके मृग और शकुनि पढ़ा? 'चार्थे' सूत्रसे सिद्ध, सूत्रमें पूर्वापर पढ़ना व्यर्थ, जातिभी नहीं। जैसे मृगोंका मृगोंके साथ, पक्षीका पक्षीके साथ, द्वन्द्व कहा है एवं पूर्वका अपरके साथ इतरेतरयोग, समाहार हो, अन्यके साथइतरेतर-योग ही हो (**पूर्वोत्तरौ अधरोत्तरौ**) न **समाहारः**, यही फल है। सेनाकाअङ्ग

अन्यथा परत्वात् 'पूर्ववदश्ववडवौ' इति स्यात्। १७ विप्रतिषिद्धं चानधिकरणवाचि ।२।४।१३। विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्वा स्यात्। शीतोष्णम्–शीतोष्णे। वैकल्पिकः समाहारद्वन्द्वः 'चार्थे' इतिसूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्ह्यद्रव्यवाचिनामेवेति नियमार्थमिदम्। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उदके स्तः। विप्रतिषिद्धं किं? नन्दकपाञ्चजन्यौ। इह पाक्षिकः समाहारद्वन्द्वो भवत्येव। १८ न दधिपय

पशुके साथ द्वन्द्वमें एकवत् होगा। अश्ववडवका ग्रहण एकपक्षमें नपुंसक लिङ्गके लिए, समाहारमें ही। द्वन्द्व एकवत्का नियम पशुके साथ विकल्प एकवत् समाहारमें या इतरेतरयोग–कोई नियम नही रहेगा, तब बोले **अन्यथा**=नपुंसक विधानका नियम न रहनेपर, समाहार द्वन्द्वमें भी नपुंसकको बाधकर पूर्वपद का पुलिङ्ग होगा। यदि नपुंसक विधान रहता है उसके सामर्थ्यसे पुं० को बाधकर नपुं० होगा।

